वा समवेतत्वे सति प्रागभावप्रतियोगित्वात् यदेवं तदेवं यथा घटः। तथा चैतानि तस्मात्तथा। उक्तपक्षे कस्यचिदनन्तर्भावेऽपि तदादाय निरुक्तस्य पक्षत्वनिर्द्देशे समूहालम्बनरूपैवानुमितिरुत्पत्स्यते। न च जन्यकृत्यजन्यत्वं तावत् अननुगतेष्वेकरूपाभावेन ग्रहीतुमशक्यमिति वाच्यं जन्यकृत्यजन्यत्वं हि जन्यकृतिजन्यान्यत्वमित्यन्यत्वेन रूपेण सामान्यलक्षणया तावतामुपस्थितेः न च जन्यत्वविशेषणव्यावृत्त्याप्रसिद्धिः प्रमेयो घट इति वदव्यावर्त्तकत्वे नापि तदुपरक्तबुद्धेरुद्देश्यत्वेन तस्योपरञ्जकत्वात्। उक्तान्यतमत्वमेव सकर्त्तृकत्वम् अतएव घटभोक्ता न तत्कर्त्ता व्यवह्रियते एवञ्च शब्दफुत्कारादीनां पक्षत्वेन ज्ञानेच्छादीनामपि पक्षत्वान्न सन्दिग्धानैकान्तः उपादानस्य सिद्धत्वेऽप्युपादेयस्यासिद्धत्वात्तद्वत्त्वेन तत्रापि चिकीर्षा। यद्वा पक्षे हेतौ च समवेतत्वं न विशेषणं तेन ध्वंसोऽपि पक्षः साध्ये चोपादानपदं कारणमात्रपरमुपादेयमेव वा जन्येच्छाकृत्यजन्यत्वञ्च पक्षे विवक्षितं तेन कृतिध्वंसस्य कृतिजन्यत्वेऽपीच्छाजन्यत्वाभावात् पक्षत्वम्। क्षितिरेव वा पक्षः न चाङ्कुरे सन्दिग्धानैकान्तिकं पक्षपक्षसमनिरपेक्षेण घटादौ निश्चितव्याप्तिलिङ्गस्य तयोर्दर्शनेनोभयत्रानुमित्यविरोधात्। नन्वनुमित्योरन्योन्यापेक्षत्वं येनान्योन्याश्रयः स्यात् प्रतिज्ञाया अविषयत्वात्तत्र पक्षसमव्यपदेशः। न चाङ्कुरस्य पक्षत्वेनानिर्द्देशात्तत्र न पक्षधर्मताज्ञानमिति वाच्यं सिषाधयिषाविरहसहकृतसाधकप्रमाणविरहवति लिङ्गज्ञानस्यानुमितिमात्रकारणत्वात्। तच्च क्षितौ पक्षावयवेनाङ्कुरे स्वत एवेति न कश्चिद्विशेषः। यदि च क्षितौ हेतुनिश्चयदशायां हेतुमत्तयाऽङ्कुरस्य निश्चयस्तदा क्व सन्दिग्धानैकान्तिकम्?। अथ पक्षसमे साध्याभावसामानाधिकरण्यसंशयाद्धेतौ व्याप्तिग्रह एव नोत्पद्यते उत्पन्नोऽपि वा वाध्यत इति चेत्तर्हि महानसे धूमव्याप्तिग्रहो न स्यात् भूतोऽपि वा बाध्येत सन्दिग्धवह्निपर्वतापर्वतधूमवतामेकधर्माभावेनापेक्षत्वात् तस्मात्साध्यसन्देहवति हेतुनिश्चयो न दोषः किन्तु गुणएव। अन्यथानुमानमात्रमुपच्छिद्येत। पक्षादन्यत्र दूषणमिति यदुक्तं तत्र पक्षान्यत्वं यदि, तदाऽनपेक्षितानुमितिर्न स्यात्। अथ सन्दिग्धसाध्यान्यत्वं साधकबाधकप्रमाणाभावविषयान्यत्वं वा विवक्षितं तदाङ्कुरेऽपि तन्नास्ति अथ प्रतिज्ञाविषयान्यत्वं तदा स्वार्थानुमित्युच्छेदः नियतविषयज्ञानाजन्यत्वेन पक्षविशेषणात् सर्वविषयज्ञानसिद्धिः साध्ये च ज्ञानेच्छाप्रयत्नानां विशेषणत्वेन विशिष्टस्य साधनत्वं विवक्षितं तेन न तदोपलक्षितत्वेनार्थान्तरं सामान्यतोऽपि साध्यनिर्द्देशे पक्षधर्मताबलेनाभिमतविशेषसिद्धेः। नन्वाद्यसाध्यद्वये घटाद्युपादानगोचरापरोक्षज्ञानचिकीर्षाकृतीनामेव जनकत्वमायातीत्यर्थान्तरम्। न च तेषां व्यभिचारात् क्षित्यादावकारणत्वमिति वाच्यम्। अनादौ प्रवाहे कस्यचित् कदाचित् क्षितिद्व्यणुकादि पूर्वं घटाद्युपादानगोचरज्ञानादिसत्त्वात्। न च सर्गाद्यकालीनस्यापि पक्षत्वात्तत्रेश्वरासिद्धिः परं प्रति तदसिद्धेरिति चेत् न ज्ञानादीनां त्रयाणां स्वविषयसमवेतकार्य्यं प्रत्येव जनकत्वावधारणेनैतदनुमानस्य तद्विषयत्वात् अतएवान्योपादानगोचरापरोक्षज्ञानाद्यजन्यत्वेन पक्षविशेषणमपि न युक्तम्। तृतीयसाध्ये तु नार्थान्तरं क्षित्यादेर्घटाद्युपादानासमवेतत्वात्। ननु सामान्यलक्षणादिप्रत्यासत्त्या क्षित्याद्युपादानगोचरं यत् प्रत्यक्षं तज्जन्यमेवास्तु तथाचेश्वरे न प्रत्यक्षं न वेच्छाप्रयत्नौ तयोः समानाधिकृतरज्ञानाविषयेऽसत्त्वात्। न च तादृशप्रत्यासत्त्यजन्यत्वं प्रत्यक्षे विशेषणं, परं प्रत्यसिद्धेरिति चेन्न द्रव्यत्वेन ज्ञानलक्षणया वा कपालगोचरप्रत्यक्षेऽपि घटादावकर्त्तृत्वात् क्षित्यादौ कर्त्तृत्वनिर्वाहकं ज्ञानं सिध्यत्तद्विलक्षणमेव सिध्यति न चावयवविभागद्वारा क्षित्यादिपुञ्जलक्षणात् समुद्रादिषु हस्तक्षेपात् परमाणुद्वयसंयोगेन द्व्यणुकेष्वस्मदादिकर्त्तृकत्वादिसतः सिद्धसाधनमिति वाच्यं तत्र हि क्षितिनाशे कर्त्तृत्वं न खण्डक्षितौ अवस्थितसंयोगेभ्य एव तदुत्पत्तेः सकलतदुपादानगोचरज्ञानेच्छाकृतीनामभावाच्च अतएव द्व्यणुकेऽपि न कर्त्तृत्वं जलक्षेपादधिकपरिमाणसमुद्रादेः सपक्षत्वमेव घटस्येव। ननु घटे साध्यविकलत्वम् अन्वयव्यतिरेकाभ्यां ज्ञानादेरेव जनकत्वात् न तु तदाश्रयस्य धर्मिग्राहकस्यान्वयव्यतिरेकस्य वा ग्राहकस्याभावात्। न च घट आत्मजन्य उत्पत्तिमत्त्वात् ज्ञानवदिति वाच्यम् आत्मसमवेतत्वस्योपाधित्वात् घट आकाशजन्य उत्पत्तिमत्त्वात् शब्दवदिति वत् अप्रयोजकत्वाच्चेति चेन्नैवं प्रयत्नवदात्मसंयोगस्य चेष्टाद्वारा घटहेतुरतः प्रयत्नवानात्मापि हेतुः न चात्मसंयोगे सत्यपि प्रयत्नं विना न चेष्टेति प्रयत्न एव तत्कारणम् असमवायिकारणं विना कार्य्यानुत्पत्तेः न चात्मसंयोगस्य कारणत्वेऽपि संयोगपरिचायकमात्रमात्मेति वाच्यं संयोगमात्रस्याकारणत्वेन संयोगिविशेषितस्य हेतुत्वात्। आत्मसंयोगव्यतिरेकप्रयुक्तक्रियाव्यतिरेकासिद्धेर्नात्मसंयोगः कारणमिति चेन्न या क्रिया व्यधिकरणयदीयगुणजन्या सा तत्संयोगासमवायिकारणिका यथा स्पर्शवद्-